Om Sri MahaaGanapathaye Namah Om Sri Gurubhyo Namah Om Rishibhyo Namah

# Sri Vishnu Sahasra Naama Homam

## Laghu Paddhati (Short Procedure)

*By P.V.R. Narasimha Rao* (www.VedicAstrologer.org)

A separate document gives a detailed description of how to perform Sri Vishnu Sahasra Naama Homam. This document puts all the mantras given in that document in one place. After one reads the other document and becomes proficient in the procedure, one can perform the homam by just referring to this document.

### Anujnaa (Permission)

ॐ ऋद्ध्यास्म हव्यैर्नमसोपसद्य । मित्रं देवं मित्रधेयं नो अस्तु । अनूराधान् हविषा वर्धयन्तः । शतं जीवेम शरदः सवीराः ।

### Aachamanam (sipping water to purify)

ॐ केशवाय स्वाहा । ॐ नारायणाय स्वाहा । ॐ माधवाय स्वाहा ।

### Vighneswara Pooja (worshipping the remover of obstacles)

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं । प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशान्तये ॥

अगजानन पद्मार्कं गजाननमहर्निशं । अनेकदं तं भक्तानां एकदन्तं उपास्महे ॥

वक्रतुंड महाकाय कोटिसूर्यसमप्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

### Praanaayaamam (restraining the life force)

ॐ नमो भगवते वासुदेवाय । ॐ नमश्शिवाय । ॐ गं गणपतये नमः ।

### Sankalpam (taking the vow)

ॐ ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वर प्रीत्यर्थम् श्री महाविष्णु प्रसाद सिद्ध्यर्थम् अद्य शुभदिने शुभमुहूर्ते श्री महाविष्णु होमकर्म यथाशक्ति करिष्ये ।

**Kalasa Suddhi (water purification)**

वं

गंगे च यमुने चैव गोदावरि सरस्वति ।

नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

अमृतं भवतु

ॐ ब्रह्मणे नमः ।

ॐ यमाय नमः ।

ॐ सोमाय नमः ।

ॐ रुद्राय नमः ।

ॐ विष्णवे नमः ।

ॐ इन्द्राय नमः ।

**Agni Pratishthaapana (fire installation)**

ॐ भूर्भुवस्सुवरोम् ।

क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ।

ॐ भूर्भुवस्सुवः स्वाहा ।

अदितेऽनुमन्यस्व । अनुमतेऽनुमन्यस्व । सरस्वतेऽनुमन्यस्व । देव सवितः प्रसुव ।

चत्वारि शृंगास्त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां॑ आविवेश ।
एष हि देवः प्रदिशो नु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः ।
स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः ।
प्राङ्मुखो देव । हे अग्ने । ममाभिमुखो भव ।

**Dikpaalaka Pooja (worshipping the rulers of directions)**

ॐ इन्द्राय नमः। ॐ अग्नये नमः। ॐ यमाय नमः। ॐ निरृतये नमः। ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ सोमाय नमः। ॐ ईशानाय नमः। ॐ ब्रह्मणे नमः। ॐ शेषाय नमः। ॐ अग्नये नमः। ॐ आत्मने नमः।

**Poorvaangam (preliminary offerings)**

ॐ प्रजापतये स्वाहा। प्रजापतय इदं न मम।

ॐ इन्द्राय स्वाहा। इन्द्रायेदं न मम।

ॐ अग्नये स्वाहा। अग्नय इदं न मम।

ॐ सोमाय स्वाहा। सोमायेदं न मम।

आरंभप्रभृति एतत्क्षणपर्यन्तं मध्ये संभावित समस्त दोष प्रायश्चित्तार्थं सर्व प्रायश्चित्तं होष्यामि। ॐ भूर्भुवस्सुवः स्वाहा। प्रजापतय इदं न मम।

**Quick Homam for Mahaganapathi**

ॐ गं गणपतये नमः। असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो देहि भोगं। ज्योक्पश्येम सूर्यमुच्चरन्तमनुमते मृळया नः स्वस्ति। ॐ श्री महागणपति प्राणशक्त्यै नमः। अत्र आगच्छ। आवाहितो भव। स्थापितो भव। सन्निहितो भव। सन्निरुद्धो भव। अवकुंठितो भव। प्रसीद प्रसीद।

लं पृथिव्यात्मने नमः। गन्धं समर्पयामि।

हं आकाशात्मने नमः। पुष्पं समर्पयामि।

यं वाय्वात्मने नमः। धूपं आघ्रापयामि।

रं अग्न्यात्मने नमः। दीपं दर्शयामि।

वं अमृतात्मने नमः। नैवेद्यं समर्पयामि।

सं सर्वात्मने नमः। सर्वोपचारान् समर्पयामि।

ॐ गं गणपतये नमः। स्वाहा।

**Praana Pratishthaapanaa (invocation of main deity)**

अस्य श्री प्राणप्रतिष्ठापन मंत्रस्य ब्रह्म विष्णु महेश्वरा ऋषयः ऋग्यजुस्सामाथर्वाणि छन्दांꣳसि श्री महाविष्णुः देवता । ह्रां बीजं । ह्रीं शक्तिः । क्रों कीलकं । ह्रां अंगुष्ठाभ्यां नमः । ह्रीं तर्जनीभ्यां नमः । ह्रूं मध्यमाभ्यां नमः । ह्रैं अनामिकाभ्यां नमः । ह्रौं कनिष्ठिकाभ्यां नमः । ह्रः करतल करपृष्ठाभ्यां नमः । ह्रां हृदयाय नमः । ह्रीं शिरसे स्वाहा । ह्रूं शिखायै वषट् । ह्रैं कवचाय हुं । ह्रौं नेत्रत्रयाय वौषट् । ह्रः अस्त्राय फट् । भूर्भुवस्सुवरोमिति दिग्बंधः ।

ध्यानं - शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगन सदृशं मेघवर्णं शुभाङ्गं
लक्ष्मीकांतं कमलनयनं योगि हृद्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथं

ॐ ह्रां ह्रीं क्रों यं रं लं वं शं षं सं हं ळं क्षं । ॐ हंसः सोऽहं सोऽहं हंसः । श्री महाविष्णोः प्राण इह प्राणः । जीव इह स्थितः । सर्वेन्द्रियाणि वाङ्मनस्त्वक् चक्षुः श्रोत्र जिह्वाघ्राण प्राणापानव्यानोदानसमानाः इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा । सान्निध्यं कुर्वन्तु स्वाहा । असुनी ते पुनरस्मासु चक्षुः पुनः प्राणमिह नो देहि भोगं । ज्योक्पश्येम सूर्यमुच्चरन्तमनुमते मृळया नः स्वस्ति । ह्रां ह्रीं क्रों । क्रों ह्रीं ह्रां । ॐ श्री महाविष्णु प्राणशक्त्यै नमः । अत्र आगच्छ ।

आवाहितो भव । स्थापितो भव । सन्निहितो भव । सन्निरुद्धो भव । अवकुंठितो भव । देव प्रसीद प्रसीद । यावद्धोमावसानकम् । तावत्त्वं प्रीतिभावेन मूर्तौ अग्नौ च सन्निधिं कुरु ।

**Panchopachaara Pooja (worship of god)**

लं पृथिव्यात्मने नमः । गन्धं समर्पयामि ।

हं आकाशात्मने नमः । पुष्पं समर्पयामि ।

यं वाय्वात्मने नमः । धूपं आघ्रापयामि ।

रं अग्न्यात्मने नमः । दीपं दर्शयामि ।

वं अमृतात्मने नमः । नैवेद्यं समर्पयामि ।

सं सर्वात्मने नमः । सर्वोपचारान् समर्पयामि ।

**Graha Aahutis (offerings to planets)**

ॐ सूर्याय स्वाहा । ॐ चंद्राय स्वाहा । ॐ मंगळाय स्वाहा । ॐ बुधाय स्वाहा । ॐ बृहस्पतये स्वाहा ।

ॐ शुक्राय स्वाहा । ॐ शनैश्चराय स्वाहा । ॐ राहवे स्वाहा । ॐ केतवे स्वाहा ।

**Pradhaana Homam (main part)**

स्वाहा

वौषट्

**Punah Pooja (worship again)**

ॐ विष्णवे नमः । नैवेद्यं समर्पयामि ।

ॐ विष्णवे नमः । नीराजनं समर्पयामि ।

**Uttaraangam (vote of thanks)**[1]

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् । स्वाहा । प्रजापतय इदं न मम ॥

ॐ भूः स्वाहा । अग्नय इदं न मम ॥

ॐ भुवः स्वाहा । वायव इदं न मम ॥

ॐ सुवः स्वाहा । सूर्यायेदं न मम ॥

यदस्य कर्मणोऽत्यरीरिचं यद्वान्यूनमिहाकरम् । अग्निष्टत् स्विष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु स्वाहा । अग्नये स्विष्टकृत इदं न मम ॥

ॐ भूर्भुवस्सुवः स्वाहा । प्रजापतय इदं न मम ॥

अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु । अग्ने तदस्य कल्पय त्वꣳ हि वेत्थ यथातथम् । स्वाहा । अग्नय इदं न मम ॥

पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः । अग्ने तदस्य कल्पय त्वꣳ हि वेत्थ यथातथम् । स्वाहा । अग्नय इदं न मम ॥

यत्पाकत्रा मनसा दीनदक्षा न । यज्ञस्य मन्वते मर्तासः । अग्निष्टद्धोता क्रतुविद्विजानन् । यजिष्ठो देवान् ऋतुशो यजाति । स्वाहा । अग्नय इदं न मम ॥

---

[1] Skip this and go to the next section to find a shorter procedure for uttaraangam.

ॐ भूः स्वाहा। अग्नय इदं न मम॥

ॐ भुवः स्वाहा। वायव इदं न मम॥

ॐ सुवः स्वाहा। सूर्यायेदं न मम॥

अस्मिन् होमकर्मणि मध्ये संभावित समस्त मंत्रलोप तंत्रलोप क्रियालोप भक्तिलोप श्रद्धालोप नियमलोप निष्ठालोप द्रव्यलोपादि समस्त दोष प्रायश्चित्तार्थं सर्व प्रायश्चित्ताहुतिं होष्यामि। ॐ भूर्भुवस्सुवः स्वाहा। प्रजापतय इदं न मम॥

ॐ श्री विष्णवे स्वाहा। विष्णवे परमात्मन इदं न मम॥

ॐ नमो रुद्राय पशुपतये स्वाहा। रुद्राय पशुपतय इदं न मम॥

**Uttaraangam – shorter version (vote of thanks)**

ॐ भूः स्वाहा। अग्नय इदं न मम॥

ॐ भुवः स्वाहा। वायव इदं न मम॥

ॐ सुवः स्वाहा। सूर्यायेदं न मम॥

ॐ भूर्भुवस्सुवः स्वाहा। प्रजापतय इदं न मम॥

ॐ श्री विष्णवे स्वाहा। विष्णवे परमात्मन इदं न मम॥

ॐ नमो रुद्राय पशुपतये स्वाहा। रुद्राय पशुपतय इदं न मम॥

**Suddhaanna Bali (sacrifice of pure rice)**

ॐ पार्षदेभ्यो नमः। बलिं समर्पयामि।

**Vasordhaaraa (stream of excellence)**

ॐ शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च मऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे॥

**Poornaahuti**

ॐ पूर्णाहुतिमुत्तमां जुहोति। सर्वं वै पूर्णाहुतिः। सर्वमेवाप्नोति। अथो इयं वै पूर्णाहुतिः। अस्यामेव प्रतितिष्ठति।
ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥
ॐ विष्णवे नमः। पूर्णाहुतिं समर्पयामि।

ॐ ब्रह्मार्पणं ब्रह्महविर् ब्रह्माग्नौ ब्रह्मणा हुतं। ब्रह्मैव तेन गन्तव्यं ब्रह्म कर्म समाधिना॥

**Winding Up and Meditation**

सप्त ते अग्ने समिधः सप्तजिह्वाः सप्त ऋषयस्सप्तः धाम प्रियाणि। सप्त होत्रा सप्त धात्वा यजन्तिसप्तयोनीरापृणस्वा घृतेन स्वाहा। अग्नये सप्तवत इदं न मम॥

अदितेऽन्वमंस्थाः। अनुमतेऽन्वमंस्थाः। सरस्वतेऽन्वमंस्थाः। देव सवितः प्रासावीः।

**Udvaasana (good bye)**

अस्मादग्नेः श्रीमहागणपतिं यथास्थानं प्रतिष्ठापयामि।
अस्मान्मूर्तेश्च अग्नेश्च श्रीमहाविष्णुं यथास्थानं प्रतिष्ठापयामि।

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम। अग्नये नमः॥

**Conclusion**

मंत्रहीनं क्रियाहीनं भक्तिहीनं हुताशन। यद्धुतं तु मया देव परिपूर्णं तदस्तु ते॥
प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै। यानि तेषामशेषाणां श्री कृष्णस्मरणं परं॥ श्री कृष्ण कृष्ण कृष्ण।
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात्। करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि॥

अनेन दिव्य मंगळ होमेन भगवान् सर्वात्मकः महाविष्णुः प्रीयताम्। ॐ तत्सत्। सर्वम् श्री कृष्णार्पणमस्तु। ॐ शान्तिः शान्तिः शान्तिः।

## Vishnu Sahasra Namam

विश्वं विष्णुर् वषट्कारो भूतभव्यभवत् प्रभुः।

भूतकृद् भूतभृद् भावो भूतात्मा भूतभावनः॥स्वाहा॥

पूतात्मा परमात्मा च मुक्तानां परमा गतिः।

अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च॥स्वाहा॥

योगो योगविदां नेता प्रधानपुरुषेश्वरः।

नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः॥स्वाहा॥

सर्वः शर्वः शिवः स्थाणुर् भूतादिर्निधि रव्ययः।

संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः॥स्वाहा॥

स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः।

अनादिनिधनो धाता विधाता धातुरुत्तमः॥स्वाहा॥

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः।

विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो धृवः॥स्वाहा॥

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः

प्रभूत स्त्रिककुब्धाम पवित्रं मंगळं परं॥स्वाहा॥

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः।

हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः॥स्वाहा॥

ईश्वरो विक्रमीधन्वी मेधावी विक्रमः क्रमः।

अनुत्तमो दुरादर्षः कृतज्ञः कृतिरात्मवान्॥स्वाहा॥

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः।

अहस्संवत्सरो व्याळः प्रत्ययः सर्वदर्शनः॥स्वाहा॥

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादि रच्युतः।

वृषाकपि रमेयात्मा सर्वयोगविनिस्सृतः॥स्वाहा॥

वसुर्वसुमनास्सत्यः समात्मा सम्मितः समः।

अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः॥स्वाहा॥

रुद्रो बहुशिरा बभ्रू विश्वयोनिः शुचिश्रवाः।

अमृतः शाश्वतः स्थाणुर् वरारोहो महातपाः॥स्वाहा॥

सर्वगः सर्वविद्भानुर् विष्वक्सेनो जनार्दनः।

वेदो वेदविदव्यंगो वेदांगो वेदवित्कविः ॥स्वाहा ॥

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।

चतुरात्मा चतुर्व्यूहः चतुर्दंष्ट्रश्चतुर्भुजः ॥स्वाहा ॥

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।

अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥स्वाहा ॥

उपेंद्रो वामनः प्रांशुरमोघः शुचिरुर्जितः ।

अतींद्रः संग्रहस्सर्गो धृतात्मा नियमो यमः ॥स्वाहा ॥

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।

अतींद्रियो महामायो महोत्साहो महाबलः ॥स्वाहा ॥

महाबुद्धिर्महावीर्यो महाशक्ति र्महाद्युतिः ।

अनिर्देश्यवपुः श्रीमान् अमेयात्मा महाद्रिधृक् ॥स्वाहा ॥

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।

अनिरुद्धः सुरानंदो गोविंदो गोविदां पतिः ॥स्वाहा ॥

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।

हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥स्वाहा ॥

अमृत्युः सर्वदृक्सिंहः संधाता संधिमान् स्थिरः ।

अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥स्वाहा ॥

गुरुर्गुरुतमो धाम सत्य स्सत्यपराक्रमः ।

निमिषोऽनिमिषः स्रग्वी वाचस्पति रुदारधीः ॥स्वाहा ॥

अग्रणीर् ग्रामणीः श्रीमान् न्यायो नेता समीरणः ।

सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥स्वाहा ॥

आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः ।

अहस्संवर्तको वह्नि रनिलो धरणीधरः ॥स्वाहा ॥

सुप्रसादः प्रसन्नात्मा विश्वसृड्विश्वभुग्विभुः ।

सत्कर्ता सत्कृतस्साधुः जह्नु र्नारायणो नरः ॥स्वाहा ॥

असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।

सिद्धार्थः सिद्धसंकल्पः सिद्धिदस्सिद्धिसाधनः ॥स्वाहा ॥

वृषाही वृषभो विष्णुः वृषपर्वा वृषोदरः ।

वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥स्वाहा ॥

सुभुजो दुर्धरो वाग्मी महेंद्रो वसुदो वसुः ।

नैकरुपो बृहद्रुपः शिपिविष्टः प्रकाशनः ॥स्वाहा ॥

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।

ऋद्धः स्पष्टाक्षरो मंत्रश्चंद्रांशुर्भास्करद्युतिः ॥स्वाहा ॥

अमृतांशूद्भवो भानुः शशबिंदु स्सुरेश्वरः ।

औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥स्वाहा ॥

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।

कामहा कामकृत्कांतः कामः कामप्रदः प्रभुः ॥स्वाहा ॥

युगादिकृद्युगावर्तो नैकमायो महाशनः ।

अदृश्यो व्यक्तऋपश्च सहस्रजिदनंतजित् ॥स्वाहा ॥

इष्टोऽविशिष्टः शिष्टेष्टः शिखंडी नहुषो वृशः ।

क्रोधहा क्रोधकृत्कर्ता विश्वबाहु र्महीधरः ॥स्वाहा ॥

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।

अपां निधि रधिष्ठान मप्रमत्तः प्रतिष्ठितः ॥स्वाहा ॥

स्कंदः स्कंदधरो धुर्यो वरदो वायुवाहनः ।

वासुदेवो बृहद्भानुरादिदेवः पुरंदरः ॥स्वाहा ॥

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।

अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥स्वाहा ॥

पद्मनाभोऽरविंदाक्षः पद्मगर्भः शरीरभृत् ।

महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गऋडध्वजः ॥स्वाहा ॥

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।

सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिंजयः ॥स्वाहा ॥

विक्षरो रोहितो मार्गो हेतु र्दामोदर स्सहः ।

महीधरो महाभागो वेगवानमिताशनः ॥स्वाहा ॥

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।

करणं कारणं कर्ता विकर्ता गहनो गुहः ॥स्वाहा ॥

व्यवसायो व्यवस्थानः संस्थानः स्थानदो धृवः ।

परर्द्धिः परमस्पष्टः तुष्टः पुष्टः शुभेक्षणः ॥स्वाहा ॥

रामो विरामो विरजोमार्गो नेयो नयोऽनयः ।

वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥स्वाहा ॥

वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।

हिरण्यगर्भश्शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥स्वाहा ॥

ऋतु सुदर्शनः कालः परमेष्ठी परिग्रहः ।

उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥स्वाहा ॥

विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम् ।

अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥स्वाहा ॥

अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो महामखः ।

नक्षत्रनेमि र्नक्षत्री क्षमः क्षाम स्समीहनः ॥स्वाहा ॥

यज्ञ इज्यो महेज्यश्च क्रतुस्सत्रं सतां गतिः ।

सर्वदर्शी निवृत्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥स्वाहा ॥

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।

मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥स्वाहा ॥

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।

वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥स्वाहा ॥

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।

अविज्ञाता सहस्रांशुः विधाता कृतलक्षणः ॥स्वाहा ॥

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।

आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥स्वाहा ॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।

शरीरभूतभृत् भोक्ता कपींद्रो भूरिदक्षिणः ॥स्वाहा ॥

सोमपोऽमृतपः सोमः पुरुजित् पुरुसत्तमः ।

विनयो जयः सत्यसंधो दाशार्हः सात्वतां पतिः ॥स्वाहा ॥

जीवो विनयिता साक्षी मुकुंदोऽमितविक्रमः ।

अंभोनिधि रनंतात्मा महोदधिशयोऽन्तकः ॥स्वाहा ॥

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।

आनंदो नंदनो नंदः सत्यधर्मा त्रिविक्रमः ॥स्वाहा ॥

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।

त्रिपदस्त्रिदशाध्यक्षो महाशृंगः कृतान्तकृत् ॥स्वाहा ॥

महावराहो गोविंदः सुषेणः कनकांगदी ।

गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥स्वाहा ॥

वेधाः स्वांगोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः ।

वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥स्वाहा ॥

भगवान् भगहाऽऽनंदी वनमाली हलायुधः ।

आदित्यो ज्योतिरादित्यः सहिष्णु र्गतिसत्तमः ॥स्वाहा ॥

सुधन्वा खंडपरशुः दारुणो द्रविणप्रदः ।

दिविस्पृक् सर्वदृग् व्यासो वाचस्पति रयोनिजः ॥स्वाहा ॥

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।

सन्न्यासकृच्छमः शांतो निष्ठा शांतिः परायणं ॥स्वाहा ॥

शुभांगः शांतिदः स्रष्टा कुमुदः कुवलेशयः ।

गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥स्वाहा ॥

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।

श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ॥स्वाहा ॥

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।

श्रीधरः श्रीकरः श्रेयः श्रीमान् लोकत्रयाश्रयः ॥स्वाहा ॥

स्वक्षः स्वंगः शतानंदो नंदि ज्योतिर्गणेश्वरः ।

विजितात्मा विधेयात्मा सत्कीर्ति श्छिन्नसंशयः ॥स्वाहा ॥

उदीर्णः सर्वतश्चक्षु रनीशः शाश्वतस्थिरः ।

भूशयो भूषणो भूतिरशोकः शोकनाशनः ॥स्वाहा ॥

अर्चिष्मानर्चितः कुंभो विशुद्धात्मा विशोधनः ।

अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥स्वाहा ॥

कालनेमिनिहा वीरः शूरः शूरजनेश्वरः ।

त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥स्वाहा ॥

कामदेवः कामपालः कामी कांतः कृतागमः ।

अनिर्देश्यवपु र्विष्णुः वीरोऽनंतो धनंजयः ॥स्वाहा ॥

ब्रह्मण्यो ब्रह्मकृत् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।

ब्रह्मवित् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥स्वाहा ॥

महाक्रमो महाकर्मा महातेजा महोरगः ।

महाक्रतु र्महायज्वा महायज्ञो महाहविः ॥स्वाहा ॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोत्रा रणप्रियः ।

पूर्णः पूरयिता पुण्यः पुण्यकीर्ति रनामयः ॥स्वाहा ॥

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।

वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥स्वाहा ॥

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।

शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥स्वाहा ॥

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।

दर्पहा दर्पदोऽ दृप्तो दुर्धरोऽथापराजितः ॥स्वाहा ॥

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।

अनेकमूर्तिरव्यक्तः शतमूर्तिश्शताननः ॥स्वाहा ॥

एको नैकः स वः कः किं यत्तत्पद मनुत्तमम् ।

लोकबंधु र्लोकनाथो माधवो भक्तवत्सलः ॥स्वाहा ॥

सुवर्णवर्णो हेमांगो वरांग श्चंदनांगदी ।

वीरहा विषमः शून्यो घृताशी रचलश्चलः ॥स्वाहा ॥

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृत् ।

सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥स्वाहा ॥

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।

प्रग्रहो निग्रहो व्यग्रो नैकशृंगो गदाग्रजः ॥स्वाहा ॥

चतुर्मूर्तिश्चतुर्बाहुः चतुर्व्यूहश्चतुर्गतिः ।

चतुरात्मा चतुर्भावः चतुर्वेदविदेकपात् ॥स्वाहा ॥

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।

दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥स्वाहा ॥

शुभांगो लोकसारंगः सुतंतुस्तंतुवर्धनः ।

इंद्रकर्मा महाकर्मा कृताकर्मा कृतागमः ॥स्वाहा ॥

उद्भवः सुंदरः सुंदो रत्ननाभः सुलोचनः ।

अर्को वाजसनः शृंगी जयंतः सर्वविज्जयी ॥स्वाहा ॥

सुवर्णबिंदु रक्षोभ्यः सर्ववागीश्वरेश्वरः ।

महाह्रदो महागर्तो महाभूतो महानिधिः ॥स्वाहा ॥

कुमुदः कुंदरः कुंदः पर्जन्यः पावनोऽनिलः ।

अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥स्वाहा ॥

सुलभः सुव्रतः सिद्धः शतृजित् शतृतापनः ।

न्यग्रोधोदुंबरोऽश्वत्थः चाणूरांध्रनिषूदनः ॥स्वाहा ॥

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।

अमूर्ति रनघोऽचिंत्यो भयकृद्भयनाशनः ॥स्वाहा ॥

अणुर्बृहत् कृशः स्थूलो गुणभृन्निर्गुणो महान् ।

अधृतः स्वधृतः स्वास्थ्यः प्राग्वंशो वंशवर्धनः ।

भारभृत्कथितो योगी योगीशः सर्वकामदः ।

आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥स्वाहा ॥

धनुर्धरो धनुर्वेदो दंडो दमयुता दमः ।

अपराजितः सर्वसहो नियंता नियमो यमः ॥स्वाहा ॥

सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः ।

अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः ॥स्वाहा ॥

विहायसगतिज्योतिः सुरुचिर् हुतभुग्विभुः ।

रविर्विरोचनः सूर्यः सविता रविलोचनः ॥स्वाहा ॥

अनंतो हुतभुक् भोक्ता सुखदो नैकदोऽग्रजः ।

अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥स्वाहा ॥

सनात् सनातनतमः कपिलः कपिरव्ययः ।

स्वस्तिदः स्वस्तिकृत् स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः ॥स्वाहा ॥

अरौद्रः कुंडली चक्री विक्रम्यूर्जितशासनः ।

शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥स्वाहा ॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।

विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥स्वाहा ॥

उत्तारणो दुष्कृतिहा पुण्यो दुस्स्वप्ननाशनः ।

वीरहा रक्षणः संतो जीवनः पर्यवस्थितः ॥स्वाहा ॥

अनंतरुपोऽनंतश्रीः जितमन्युर्भयापहः ।

चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥स्वाहा ॥

अनादिर् भूर्भुवो लक्ष्मीः सुवीरो रुचिराम्गदः ।

जननो जनजन्मादिर् भीमो भीमपराक्रमः ॥स्वाहा ॥

आधारनिलयोऽधाता पुष्पहासः प्रजागरः ।

ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥स्वाहा ॥

प्रमाणं प्राणनिलयः प्राणधृत् प्राणजीवनः ।

तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥स्वाहा ॥

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।

यज्ञो यज्ञपतिर्यज्वा यज्ञांगो यज्ञवाहनः ॥स्वाहा ॥

यज्ञभृत् यज्ञकृत् यज्ञी यज्ञभुक् यज्ञसाधनः ।

यज्ञान्तकृत् यज्ञगुह्यमन्नमन्नाद एव च ॥स्वाहा ॥

आत्मयोनिः स्वयंजातो वैखानस्सामगायनः ।

देवकीनंदनः स्रष्टा क्षितीशः पापनाशनः ॥स्वाहा ॥

शङ्खभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः ।

रथांगपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥स्वाहा ॥

वनमाली गदी शार्ङ्गी शंखी चक्री च नंदकी ।

श्रीमान्नारायणो विष्णुर् वासुदेवोऽभिरक्षतु ॥स्वाहा ॥